णीये च त्रि ॥ पानार्हद्रव्यविशेषः। पाना इति वङ्गभाषा। शरवत् इति पारस्यभाषा। तत्र अम्लिकापानीयं पित्तवमिनाशकम्। मिष्ट-दाड़िमीपानीयं प्रतिश्यायकाशनाशकम्। अम्ल-दाड़िमीपानीयं उदरविकारे धारकं क्षुधावृद्धि-कारकञ्च। निम्बूपानीयं छर्द्दिहृल्लासपित्तज्वर-निवारकं सकलाहारपाचकञ्च। नागरङ्ग-पानीयं कासपित्तविनाशकं अन्तःकरणप्रशस्य-जनकञ्च। सेवचन्दनपानीयं बलकारकं उन्माद-मूर्च्छारोगशान्तिकारकं रतिशक्तिवर्द्धकं उदर-विकारोपकारकञ्च। इति पाकराजेश्वरः॥ (अन्यत् पानकशब्दे द्रष्टव्यम् ॥ * ॥) जल-दानविधिर्यथा,—

यम उवाच।

"एतत्ते कथितं विप्र! मम लोके तु दुर्लभम्।
पानीयं सन्ततन्तस्माद्दातव्यं सुखमिच्छता ॥
अतोऽर्थं कारयेत् कूपं वापीं वा बहुपल्वलम्।
बहुलोकाकुले देशे सर्व्वसत्त्वोपजीवितम् ॥"
इत्यग्निपुराणम् ॥

तद्दानानन्तरं पाठ्यमन्त्रो यथा,—
"पानीयं प्राणिनः प्राणाः पानीयं पावनं महत्।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ॥"
इति स्मृतिः ॥

तत्पर्य्यायः।
"पानीयजीवनवनामृतपुष्कराम्भः-
पाथोऽम्बुशम्बरपयःसलिलोदकानि।
आपः कवारणकबन्धजलानि नीरं
कीलालवारिकमलानि विषाणंसी च ॥
भुवनं दहनारातिर्वाक्तोयं सर्व्वतोमुखम्।
चीरं घनरसं निम्नगं मेघप्रसवो रसः ॥"

अस्य साधारणगुणाः।
"पानीयं मधुरं हिमञ्च रुचिदं तृष्णाविशोषापहं
मोहभ्रान्तिमपाकरोति कुरुते भुक्तान्नपक्तिं पराम्।
निद्रालस्यनिरासनं विषहरं श्रान्तार्त्तिसन्तर्पणं
नृणां धीबलवीर्य्यवृद्धिजननं गद्याङ्गपुष्टिप्रदम् ॥"
सद्यो दृष्टाम्बु भूमिस्थं कलुषं दोषदायकम्।
चिरस्थितं लघु स्वच्छं पथ्यं स्वादु सुखावहम् ॥"

देशभूमिविशेषजलगुणाः।
"जातं ताम्रमृदस्तदेव सलिलं वातादिदोषप्रदं
देशाच्छादकरञ्च दुर्ज्जरतरं दोषावहं धूसरात्।
वातघ्नञ्च शिलाशिरोत्थममलं पथ्यं लघु स्वादुकं
श्रेष्ठं श्याममृदश्चिदोषशमनं सर्व्वामयघ्नं जलम् ॥"
इति राजनिर्घण्टः ॥

"पिच्छिलं क्रमिलं क्लिन्नं पर्णशैवालकर्द्दमैः।
विवर्णं विरसं सान्द्रं दुर्गन्धि न हितं जलम् ॥
चन्द्रार्ककरसंजुष्टं वायुना स्फालितं मुहुः।
पर्व्वतोपरि यद्वारि समं पौरन्दरेण तत् ॥
तस्यानुगुणमुद्दिष्टं शैलप्रस्रवणोद्भवम्।
लेखनं दीपनं रूक्षं किञ्चिद्वातप्रकोपणम् ॥"
इति राजवल्लभः ॥

पानीयनकुलः, पुं, (पानीये जले नकुल इव।) उद्रः। उद्बिड़ाल इति भाषा। यथा,—
"उद्रस्तु जलमार्ज्जारः पानीयनकुलो वसी ॥"
इति हेमचन्द्रः ॥

पानीयपृष्ठजः, पुं, (पानीयपृष्ठे जलोपरि जायते इति। जन + डः।) कुम्भी। इति रत्नमाला ॥ पाना इति भाषा ॥

पानीयफलं, क्ली, (पानीयजातं फलमिति मध्य-पदलोपी समासः।) मखान्नम्। इति भाव-प्रकाशः ॥ माखाना इति भाषा।

पानीयमूलकं, क्ली, (पानीयमेव मूलमस्य। ततः कप्।) सोमराजी। इति शब्दचन्द्रिका ॥

पानीयवर्णिका, स्त्री, (पानीयं वर्णयति प्रका-शयतीति। वर्णि + ण्वुल्। टाप् अत इत्वञ्च।) वालुका। इति राजनिर्घण्टः ॥

पानीयशालिका, स्त्री, (पानीयस्य जलस्य वित-रणार्थं शालिका शालागृहमित्यर्थः।) जला-वस्थानगृहम्। पानिशाला इति जलछत्र इति च भाषा। तत्पर्य्यायः। प्रपा २। इत्यमरः ॥ तत्कर्तृफलं यथा,—
"कूपारामप्रपाकारी तथा वृक्षादिरोपकः।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम् ॥"
इत्युद्वाहतत्त्वे यमः ॥

पानीयामलकं, क्ली, (पानीयमामलकं पानीयाख्यं आमलकं वा।) प्राचीनामलकम्। पानि आमला इति भाषा। अस्य गुणाः। दोषत्रय-ज्वरनाशित्वम्। इति भावप्रकाशः ॥ मुख-शुद्धिमलबद्धकारित्वम्। अम्लत्वम्। स्वादुत्वञ्च। इति राजवल्लभः ॥

पानीयालुः, पुं, (पानीयसम्भूत आलुः।) कन्द-विशेषः। पनियालु इति हिन्दीभाषा। तत्-पर्य्यायः। जलालुः २ क्षुपालुः ३ वालुकः ४। अस्य गुणः। त्रिदोषनाशित्वम्। मन्मर्पणकारि-त्वञ्च। इति राजनिर्घण्टः ॥

पानीयाश्रा, स्त्री, (पानीयं जलं अश्नातीति। अश ग् भोजने + बाहुलकात् नः ततष्टाप्।) बल्वजा। इति राजनिर्घण्टः ॥

पान्थः, त्रि, (पथि कुशलः पन्थानं नित्यं गच्छ-तीति वा। "पथो ण नित्यम्।" ५।१।७६। पथः पन्थ च इत्यनेन पन्थादेशे कृते णः।) पथिकः। इत्यमरः। २।८।१७॥ (यथा, हरिवंशे। ४९। २।
"यथा निदाघसमये सूर्य्यांशुपरिपीड़ितः।
पान्थो याति जलं दृष्ट्वा त्वरितं तत्पिपा-सया ॥")

पापं, क्ली, (पाति रक्षति अस्मादात्मानमिति। पा + "पानीविषिभ्यः पः।" उणां। ३।२३। इति पः।) अधर्म्मम्। दुरदृष्टम्। तत्पर्य्यायः। पङ्कम् १ पाप्मा २ पापम् ३ किल्विषम् ४ कल्मषम् ५ कलुषम् ६ वृजिनम् ७ एनः ८ अघम् ९ अंहः १० दुरितम् ११ दुष्कृतम् १२। इत्यमरः ॥ पातकम् १३ तूस्तम् १४ कल्कम् १५ शल्यम् १६ पापकम् १७। इति शब्दरत्नावली (निषिद्धकर्म्मानुष्ठानविहितकर्म्माननुष्ठानाभ्यां पापोत्पत्तिं सविशेषमाह श्रीसदाशिवः।
"अनुष्ठानं निषिद्धस्य त्यागो विहितकर्म्मणः।
नृणां जनयतः पापं क्लेशशोकामयप्रदम् ॥
स्वानिष्टमात्रजननात् परानिष्टोपपादनात्।
तदेव पापं द्विविधं जानीहि कुलनायिके! ॥
परानिष्टकरात् पापात् मुच्यते राजशासनात्।
अन्यस्मान्मुच्यते मर्त्त्यः प्रायश्चित्त्या समाधिना ॥
प्रायश्चित्तयाथवा दण्डैर्न पूता ये कृतांहसः।
नरकान् न निवर्त्तन्ते इहामुत्र निगर्हिताः ॥"
इति श्रीमहानिर्व्वाणतन्त्रे ॥)

तद्दशविधं यथा,—
"प्राणाभिपातनं स्तैन्यं परदारमथापि च।
त्रीणि पापानि कायेन सर्व्वतः परिवर्ज्जयेत् ॥
असत्प्रलापं पारुष्यं पैशुन्यमनृतन्तथा।
चत्वारि वाचा राजेन्द्र! न जल्पेत न चिन्तयेत् ॥
अनभिध्या परस्वेषु सर्व्वसत्त्वेषु सौहृदम्।
कर्म्मणां फलमस्तीति त्रिविधं मनसा चरेत् ॥"
इति शान्तिपर्व्वणि दानधर्म्मः ॥

स्तुलुक्तान्येतानि पातकशब्दे लिखितानि ॥ * ॥
पापस्य पुरुषत्रयानुवर्त्तित्वं यथा,—
"नाधर्म्मश्चरितो राजन्! सद्यः फलति गौरिव।
शनैरावर्त्तमानस्तु मूलान्यपि निकृन्तति ॥
यदि नात्मनि मित्रेषु न चेत् पुत्रेषु नप्तृषु।
पापमाचरितं कर्म्म त्रिवर्गमनुवर्त्तते ॥
फलत्येवं ध्रुवं पापं गुरुभुक्तमिवोदरे ॥"
इति मात्स्ये २८ अध्यायः ॥ * ॥

तीर्थस्य पापनाशकत्वं तत्र कृतपापस्य वज्र-लेपत्वञ्च। यथा,—
"अन्यत्र हि कृतं पापं तीर्थमासाद्य गच्छति।
तीर्थे तु यत् कृतं पापं वज्रलेपो भविष्यति ॥
मथुरायां कृतं पापं तत्रैव च विनश्यति।
एषा पुरी महापुण्या यस्यां पापं न विद्यते ॥"
इति वाराहे मथुरामाहात्म्यम् ॥ * ॥

शेषपापलक्षणं यथा,—
"अतः परं प्रवक्ष्यामि शेषपापस्य लक्षणम्।
सर्व्वं देवर्षिभूतानां मनुष्याणां विशेषतः ॥
पितॄणाञ्च द्विजश्रेष्ठ! सर्व्ववर्णेषु चैकतः।
ॐकारादिनिवृत्तिश्च पापकार्य्यकृतिश्च या ॥
हत्यादिकं महापापं त्वगम्यागमनं तथा।
घृतादिविक्रयं घोरं चाण्डालादिप्रतिग्रहम् ॥
स्वदोषगोपनं पापं परदोषप्रकाशनम्।
ईर्षाविद्धं वाक्यदुष्टं निष्ठुरत्वं षड़म्बरम् ॥
ठाकित्वं तालवादित्वं नाम्ना वाचाप्यधर्म्मिणः।
भारत्वमधार्म्मिक्यं नरकावहमुच्यते ॥
एतैः पापैस्तु संयुक्तः पच्यते यदि शङ्करः ॥"
इति वामने ५८ अध्यायः ॥

साङ्कर्य्यनामकपापानि यथा,—
"एकशय्याशनं पंक्तिभाण्डपक्वान्नमिश्रणम्।
याजनाध्यापने योनिस्तथैव सहभोजनम् ॥
सहाध्यायस्तु दशमः सहयाजनमेव च।